शूद्रान्नभोजी विप्रश्च विषहीनो यथोरगः ॥
शवदाही च शूद्राणां यो विप्रो वृषलीपतिः ।
शूद्राणां सूपकारी च शूद्रयाजी च यो द्विजः ।
असिजीवी मसीजीवी विषहीनो यथोरगः ॥
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ।
भगजीवी वार्द्धुषिको विषहीनो यथोरगः ।
यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विषहीनो यथोरगः ॥
सूर्य्योदये च द्विर्भोजी मत्स्यभोजी च यो द्विजः ।
शिलापूजादिरहितो विषहीनो यथोरगः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥*॥
अपि च ।
“यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ।
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ॥
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम् ।
तत्पितॄणां सुराणाञ्च पूजने तत्समं सति ॥
कोटिजन्मार्जितं पुण्यं सन्ध्यार्च्चातपसार्जितम् ।
द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ॥
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपतिः ।
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ॥”
अपि च ।
“करोत्यशुद्धां सन्ध्याञ्च सन्ध्यां वा न करोति यः ।
त्रिसन्ध्यं वर्जयेद्यो वा सन्ध्याहीनश्च स द्विजः ॥
नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा,
“तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये ॥
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥”
पारिभाषिकमहापातकिब्राह्मणा यथा,—
“शूद्रसेवी शूद्रयाजी ग्रामयाजीति कीर्त्तितः ।
देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः ॥
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः ।
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
विप्राणामाशीर्वचनं पूर्णस्वस्त्ययनं यथा,—
“आशिषं कर्त्तुमर्हन्ति प्रसन्नमनसा शिशुम् ।
पूर्णस्वस्त्ययनं सद्यो विप्राशीर्वचनं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
ब्राह्मणस्य स्वधर्म्मो यथा,—
“ब्राह्मणस्य स्वधर्म्मश्च त्रिसन्ध्यमर्च्चनं हरेः ।
तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम् ॥
अन्नं विष्ठा जलं मूत्रमनिवेद्यं हरेर्नृप ! ।
भवन्ति शूकराः सर्व्वे ब्राह्मणा यदि भुञ्जते ॥
आजीवं भुञ्जते विप्रा एकादश्यां न भुञ्जते ।
कृष्णजन्मदिने चैव शिवरात्रौ सुनिश्चितम् ॥
तथा रामनवम्याञ्च यत्नतः पुण्यवासरे ।
ब्राह्मणानां स्वधर्म्मश्च कथितो ब्रह्मणा नृप ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः ॥
गृहस्थब्राह्मणनियमा यथा,—
“वेदं वेदौ तथा वेदानधीत्य तु समाहितः ।
तदर्थमभिगम्याथ तत्र स्नायाद्द्विजोत्तमः ॥
गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ मुक्तात्मा सशक्तः स्नातुमर्हति ॥
वैणवीन्धारयेद्यष्टिमन्तर्व्वासमथोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ॥
छत्रञ्चोष्णीषममलं पादुके चाप्युपानहौ ।
रौक्मे च कुण्डले धार्य्ये कृत्तकेशनखः शुचिः ॥
स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं न धारयेत् ।
अन्यत्र काञ्चनाद्विप्रो न रक्तां बिभृयात् स्रजम् ॥
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
न रक्तमुल्वणञ्चान्य धृतं वासो न कुण्डिकाम् ।
नोपानहौ स्रजं वाथ पादुके च प्रयोजयेत् ॥
उपवीतमलङ्कारं कुम्भान् कृष्णाजिनानि च ।
नापसव्यं परीदध्याद्वासो न विकृतं वसेत् ॥
आहरेद्विधिवद्दारान् सदृशानात्मनः शुभान् ।
रूपलक्षणसंयुक्तां योनिदोषविवर्ज्जिताम् ॥
अमातृगोत्रप्रभवामसमानार्षगोत्रजाम् ।
आहरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम् ॥
ऋतुकालाभिगामी स्याद्यावत् पुत्त्रोऽभिजायते ।
वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ॥
षष्ठ्यष्टमी पञ्चदशी द्वादशी च चतुर्द्दशी ।
ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्रयाहनि ॥
आदधीतावसथ्याग्निं जुहुयाज्जातवेदसम् ।
व्रतानि स्नातको नित्यं पावनानि च पालयेत् ॥
वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः ।
अकुर्व्वाणः पतत्याशु नरकानतिभीषणान् ॥
अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान्न हापयेत् ।
कुर्य्याद्गृह्याणि कर्म्माणि सन्ध्योपासनमेव च ॥
सख्यं समाधिकैः कुर्य्यादुपेयादीश्वरं सदा ।
दैवतान्यपि गच्छेत्तु कुर्य्याद्भार्य्याभिपोषणम् ॥
न धर्म्मं ख्यापयेद्विद्वान् न पापं गूहयेदपि ।
कुर्व्वीतात्महितं नित्यं सर्व्वभूतानुकम्पकः ॥
वयसः कर्म्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
देशवाग्बुद्धिसारूप्यमाचरन् विचरेत् सदा ॥
श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यच्च सेवितः ।
तमाचारन्निषेवेत नेहेतान्यत्र कर्हिचित् ॥
येनास्य पितरो याता येन याताः पितामहाः ।
येन याति सतां मार्गं तेन गच्छंस्तरिष्यति ॥
नित्यं स्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतिमान् ।
सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ॥
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः ।
अनसूयुर्म्मृदुर्दान्तो गृहस्थः प्रत्यवर्द्धत ॥
वीतरागभयक्रोधो लोभमोहविवर्ज्जितः ।
सावित्रीजापनिरतः श्रद्धावान् मुच्यते गृही ॥
मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः ।
दाता यज्वी देवभक्तो ब्रह्मलोके महीयते ॥
त्रिवर्गसेवी सततं देवतानाञ्च पूजनम् ।
कुर्य्यादहरहर्न्नित्यं नमस्येत् प्रयतः सुरान् ॥
विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
गृहस्थस्तु समायुक्तो न गृहे न गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मं नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥
एतस्मान्न प्रमाद्येत विशेषेण द्विजोत्तमः ।
यथाशक्ति चरन् कर्म्म निन्दितानि विवर्जयेत् ॥
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ।
गृहस्थो मुच्यते बन्धान्नात्र कार्य्या विचारणा ॥
विगर्हातिक्रमक्षेपहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा ॥
स्वदुःखेष्विव कारुण्यं परदुःखेषु सौहृदात् ।
दया यन्मुनयः प्राहुः साक्षाद्धर्म्मस्य साधनम् ॥
चतुर्द्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु ।
धर्म्मकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
सत्येन लोकं जयति सत्यन्तत् परमं पदम् ।
यथा भूतप्रवादस्तु सत्यमाहुर्मनीषिणः ॥
दमः शरीरोपरतिः शमः प्रज्ञा प्रसादजः ।
अध्यात्ममक्षरं विद्याद्यत्र गत्वा न शोचति ॥
यया स देवो भगवान् विद्यते यत्र विद्यते ।
साक्षादेव महादेव ! तज्ज्ञानमिति कीर्त्तितम् ॥
तन्निष्ठस्तत्परो विद्वान्नित्यमक्रोधनः शुचिः ।
महायज्ञपरो विप्रो लभते तदनुत्तमम् ॥
धर्म्मस्यायतनं यत्नाच्छरीरं परिपालयेत् ।
न हि देहं विना रुद्र ! पुरुषैर्विद्यते परः ॥
नित्यं धर्म्मार्थकामेषु युञ्जीत नियतो द्विजः ।
न धर्म्मवर्जितं काममर्थं वा मनसा स्मरेत् ॥
सीदन्नपि स्वधर्म्मेण नत्वधर्म्मं समाचरेत् ।
धर्म्मो हि भगवान्देवो गतिः सर्व्वेषु जन्तुषु ।
भूतानां प्रियकारी स्यान्न परद्रोहकर्म्मधीः ॥
न वेददेवतानिन्दां कुर्य्यात्तैश्च न सम्वदेत् ।
यस्त्विमं नियतो विप्रो धर्म्माध्यायं पठेत् शुचिः ।
अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते ॥”
इति कौर्म्मे उपविभागे १४ अध्यायः ॥
अपि च । सूत उवाच ।
“आनृशंस्यं क्षमा सत्यमहिंसा दममार्दवम् ।
ध्यानं प्रसादो माधुर्य्यमार्ज्जवं शौचमेव च ॥
इज्या दानं तपः सत्यं स्वाध्यायो ह्यात्मनिग्रहः ।
व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम् ॥
एभिर्युक्तो मुनिश्रेष्ठा यः सदा वर्त्तते द्विजः ।
हुत्वा तु पावकं सर्व्वं परं ब्रह्माधिगच्छति ॥
अविद्यो वा सविद्यो वा निरग्निः साग्निकोऽपि वा ।
यो विप्रस्तपसा युक्तः स परं स्वर्गमाप्नुयात् ॥
सर्व्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् ॥
ब्राह्मणस्य तपो वक्ष्ये तन्मे निगदतः शृणु ।
सायं प्रातश्च यः सन्ध्यामुपास्ते स्वच्छमानसः ॥
जपन् हि पावनीं देवीं गायत्त्रीं वेदमातरम् ।
तपसा भावितो देव्या ब्राह्मणः पूतकिल्बिषः ॥